बलिभुक्‌श्येनकौ ख्यातौ भविष्यन्तौ सुनिश्चितम् ।
श्येनो हिरण्यवर्णश्च पिङ्गलः शुक्लवर्णकः ॥
काको रक्तोऽसितश्चित्रः कुक्कुटः श्यामलः शिखी ।
काको बलीयान् सर्व्वेभ्यस्तस्मात् श्येनो हि दुर्ब्बलः ॥
कुक्कुटो दुर्ब्बलस्ताभ्यां पिङ्गलस्तेभ्य ऊनकः ।
सर्व्वेभ्यो दुर्ब्बलः पक्षी नीलकण्ठो न संशयः ॥
बली मयूरात् कुजस्तु ताम्रचूड़स्तयोर्ब्बली ।
एतेभ्यो बलवान श्येनस्तुर्णां वायसो बली ॥*॥
मित्रं मयूरः श्येनस्य मयूरस्य च पिङ्गलः ।
ताम्रचूड़स्य सुहृदौ मयूरपिङ्गलौ तथा ॥
वायसस्यापि मित्रं स्यात् शिखी भवति सर्व्वदा ।
सुहृदौ पिङ्गलश्येनौ मयूरारुणशेखरौ ॥ * ॥
काककुक्कुटश्येनाश्च पिङ्गलस्य च विद्विषः ।
मयूरस्य रिपू नित्यं सर्व्वदा श्येनवायसौ ॥
भवतः श्येनकाकौ द्वौ ताम्रचूड़स्य विद्विषौ ।
काकस्य शत्रवो नित्यं पिङ्गलश्येनकुक्कुटाः ॥*॥
ऊर्द्धदृष्टिर्भवेत् जीवो ह्यधोदृष्टिस्तु मूलकम् ।
समदृष्टिर्भवेद्धातुरेते चिन्ताप्रभेदकाः ॥ * ॥
श्येनो मूलं तथा कुजो जीवो धातुश्च वायसः ।
कुक्कुटो मूलजीवौ च मूलधातू शिखण्ड्यपि ॥*॥
श्येनो नरो वधूः कुजः पुरुषो वायसस्तथा ।
कुक्कुटः स्त्री पुमांश्चैव शिखी नपुंसकस्तथा ॥*॥
श्येनकुजौ द्विजश्रेष्ठौ महीपालस्तु वायसः ।
ताम्रचूड़ो वणिक् शूद्रो नीलकण्ठस्तथान्त्यजः ॥*॥
चतुष्पात् पिङ्गलो ज्ञेयो द्विपदौ श्येनवायसौ ।
ताम्रचूड़ो नखी शृङ्गी शिखण्डी पक्षिजीवकः ॥*॥
श्येनो सुखं कण्ठबाहू कुजो वक्षस्तु वायसः ।
कुक्कुटः पृष्ठभागः स्यात् शिखी पादयुगं क्रमात् ॥*
श्येनो भूम्यां धनं ज्ञेयं पिङ्गलो जलपङ्कयुक् ।
वायसस्तृणसङ्घाते कुक्कुटो भस्मनावृतम् ॥
श्येनः शिखी गृहानर्थं बन्धुस्थानेषु निश्चितम् ।
स्वग्रामे श्येनकुजौ तु वायसो बन्धुमाप्नुयात् ॥
कुक्कुटः परदेशे च परग्रामे तथा शिखी ।
कुजस्तु दशहस्ते च लर्द्धक्रोशे तु कुक्कुटः ॥
द्विक्रोशे तु तथा काकः श्येनः क्रोशे तु पूर्ब्बतः ।
मयूरो योजने चेति तथैवं दूरनिश्चयः ॥ * ॥
सक्तौ च मासो गमने च पक्षो
राज्ये दिनानि त्वयनन्तु सुप्ते ।
मृते च वर्षं शकुनस्य चर्य्या
कालप्रमाणं सुनयो वदन्ति ॥
शुक्रे चन्द्रे गुल्मवल्ली लताकन्दौ बुधे तथा ।
पत्रं गुरौ फलं सूर्य्ये मूलञ्च रविजे कुजे ॥ * ॥
शुक्रे चन्द्रे भवेद्रौप्यं बुधे स्वर्णमुदाहृतम् ।
गुरौ रत्नयुतं हेम सूर्य्ये मौक्तिकमेव च ॥
भौमे ताम्रं शनौ लौहं राहावस्थीनि कीर्त्तयेत् ।
एतेषां धातुभेदञ्च वाराणामुदयक्रमात् ॥ * ॥
शुक्रे चन्द्रे जलाधारो देवतावसतिर्गुरौ ।
रवौ चतुष्पदस्थानमिष्टकानिलयो बुधे ॥
दग्धस्थानं कुजे प्रोक्तं शनौ राहौ च वाह्यभूः ।
अमीभिर्हिबुके स्थाने नष्टभूमिं विलोकयेत ॥*॥
रवौ भौमे च भेरुण्डो मयूरो वायसः शनौ ।
पादायुधः शिखी शुक्रे काककुजौ गुरौ तथा ॥
कुजकुक्कुटाविन्दुज्ञौ क्रमोऽयं शुक्लकृष्णयोः ।
यस्य वारस्य यः पक्षी तदादिं गणयेद्‌बुधः ॥
दिनपक्षी कार्य्यरूपी प्रश्नपक्षी फलप्रदः ।
दिनेषु शुक्लपक्षे यत् कृष्णे रात्रिषु तत्तथा ॥
कृष्णे दिनेषु यद्यत्तत् शुक्ले रात्रिषु योजयेत् ।
बालः कुमारस्तरुणो वृद्धो मृत इति क्रमात् ॥
घटिका षट् षड़ेवं हि फलमेषामुदीरितम् ।
किञ्चिल्लाभकरो बालः कुमारस्त्वर्द्धलाभदः ॥
तरुणो राज्यदो वृद्धो हानिदो मृत्युदो मृतः ।
भोजनं गमनं राज्यं निद्रा मरणमेव च ॥
एकान्तरे भवेत् कृष्णे शुक्ले स्यात् क्रमशो विदुः ।
पक्षिणां क्रमशो ज्ञात्वा फलं ब्रूयात् यथा तथा ॥
गणयेत् पञ्चपक्ष्यादौ जातभूतगणाद्यपि ॥”
शुक्लपक्षे ॥ * ॥ ततः कृष्णपक्षे ।
“भोजनं मरणञ्चैव निद्रा राज्यं तथैव च ।
गमनं पञ्चपक्षाणां कृष्णपक्षे क्रमो दिवा ॥ * ॥
राज्यं सुभिक्षमक्षोभं नष्टलाभं सदा जयम् ।
रोगमुक्तं महालाभं पक्षिणां भुक्तिलक्षणम् ॥*॥
अनायासेन दृष्टिः स्याददृष्टधनसञ्चयः ।
भूलाभो रोगनाशश्च यात्रासिद्धी रणे जयः ॥
दूरादागमनं योगः प्रयाणे पक्षिलक्षणम् ।
राज्योदये यदि प्रश्नो लाभार्थे स्वल्पलाभदः ॥
रुजानां चिररोगः स्यात् याने हानिः क्षयो रणे ।
पुरग्रामप्रवेशश्च गमनं कलहं तथा ।
मनश्चञ्चलमारोग्यं गमनेषु विचारयेत् ॥ * ।
राज्यलाभो जयं सौख्यमक्षोभं रोगनाशनम् ।
सुभिक्षं बहुवृष्टिश्च पक्षिणां राज्यलक्षणम् ॥*॥
यात्राहानिरनावृष्टिः कार्य्यहानिरदर्शनम् ।
व्याधिश्च दीर्घरोगश्च पक्षिणां सुप्तिलक्षणम् ॥
अपमृत्युभयञ्चैव सर्व्वकार्य्यविनाशनम् ।
एतदेव फलं ब्रूयात् पक्षिणां मृत्युलक्षणम् ॥*॥
श्येने भोक्तरि काकस्तु पान्थो राजा भुजङ्गभुक् ।
स्वप्नावस्थां गतः कुजः परासुस्ताम्रशेखरः ॥ * ॥
काके भोक्तरि केकी तु पान्थः स्यात् पिङ्गलो नृपः ।
ताम्रचूड़स्तथा स्वापी श्येनः कालवशं गतः ॥*॥
मयूरे भोक्तरि तथा कुजो यात्रावशं गतः ।
महीपः कुक्कुटः श्येनः स्वापी काको वशं गतः ॥
कुजे भोक्तरि पान्थस्तु कुक्कुटः श्येनको नृपः ।
काको निद्रावशं यातो मयूरो मरणं गतः ॥*॥
कुक्कुटे भोक्तरि श्येनः पान्थो राजा तु वायसः ।
शिखी निद्रावशं यातः पिङ्गलः कालमाप्नुयात् ॥”
इति कृष्णपक्षस्य दिवाक्रमः शुक्लपक्षस्य रात्रिक्रमश्च ॥ स्वरोऽपि यथा । अशुभोदिते । उभ्मोदितेन । ओमित्येवायुः । इत्येव जुहो । एवमुक्तोऽपि ॥*॥
“श्येने भोक्तरि कुजः स्यात् पान्थः काको महीपतिः ।
ताम्रचूड़ो निद्रितश्च शिखी कालवशं गतः ॥ * ॥
मयूरे भोक्तरि श्येनः पान्थः कुजो महीपतिः ।
स्वप्नावस्थां गतः काकस्ताम्रचूड़ो मृतस्तथा ॥*॥
कुक्कुटे भोक्तरि शिखी सदा गमनमाप्नुयात् ।
श्येनो महीपतिः कुजः स्वापी काको मृतिं गतः ॥*॥
काके भोक्तरि यात्रायां ताम्रचूड़ः शिखी नृपः ।
निद्रायां रमते श्येनः कुजः कालवशं गतः ॥ * ॥
कुजे भोक्तरि यात्रायां वायसः कुक्कुटो नृपः ।
नीलकण्ठस्तथा स्वापी श्येनो मृत्युवशं गतः ॥”
इति शुक्लपक्षस्य दिवाक्रमः कृष्णपक्षस्य रात्रिक्रमश्च ॥ * ॥ स्वरोऽपि यथा । अहिपुरेभोः । गोकरिपुरे । एकोनरिपुः । उपेन्द्रो हरिः । विष्णुस्ते लोकः ॥ * ॥
“इत्युक्तं पक्षिणां कार्य्यं लाभालाभं शुभाशुभम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
तावद्गर्ज्जन्ति शास्त्राणि शकुनानामनेकशः ।
यावन्न श्रूयते पक्षिशकुनं शङ्करोदितम् ॥”
इति श्रीमहादेवविरचितं पञ्चपक्षिशाकुनं समाप्तम् ॥

पञ्चपर्णिका, स्त्री, (पञ्च पञ्च पर्णान्यस्याः । ततः कप् कापि अतः इत्वम् ।) गोरक्षीक्षुपः । इति राजनिर्घण्टः ॥

पञ्चपल्लवं, क्ली, (पञ्चानां पल्लवानां समाहारः ।) आम्रादिपत्रपञ्चकम् । यथा,—
“आम्रजम्बूकपित्थानां बीजपूरकविल्वयोः ।
गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम् ॥”
इति शब्दचन्द्रिका ॥
वैदिककर्म्मणि घटोपरिदेयपञ्चपल्लवं यथा,— आमाश्वत्थवटपर्कटीयज्ञोडुम्बराणि । तान्त्रिक-: कर्म्मणि पञ्चपल्लवं यथा,—
“पनसाम्रं तथाश्वत्थं वटं वकुलमेव च ।
पञ्चपल्लवमुक्तञ्च मुनिभिस्तन्त्रवेदिभिः ॥”
इति तन्त्रसारः ॥

पञ्चपात्रं, क्ली, पञ्चानां पात्राणां समाहारः । इति व्याकरणम् ॥ पञ्चपात्रकरणकपार्व्वणविधिकश्राद्धम् । तत्तु अन्वष्टकाश्राद्धम् । अमावस्यामृतप्रेतपक्षमृतसाम्वत्सरिकं सपिण्डीकरणञ्च । इति लोकप्रसिद्धम् ॥

पञ्चपित्तं, क्ली, (पञ्चविधं पित्तम् ।) पित्तपञ्चकम् । यथा,—
“वराहच्छागमहिषमत्स्यमायूरपित्तकम् ।
पञ्चपित्तमिति ख्यातं सर्व्वेष्वेव हि कर्म्मसु ॥”
इति वैद्यकम् ॥

पञ्चप्रदीपः, पुं, (पञ्चसंख्यकाः प्रदीपा यत्र ।) पञ्चदीपयुक्तारात्रिकम् । यथा,—
“कुर्य्यात् सप्तप्रदीपेन शङ्खघण्टादिवाद्यकैः ।
हरेः पञ्चप्रदीपेन बहुशो भक्तितत्परः ॥”
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥

पञ्चप्रासादः, पुं, (प्रसीदन्ति मनांसि अत्र । प्र + सद + अधिकरणे घञ् । “उपसर्गस्य दीर्घत्वं क्वचिद्घञादौ क्वचिद्भवेत् ।” इति वचनात् दीर्घः । पञ्चचूड़ान्वितः प्रासादः । मध्यपदलोपिकर्म्मधारयः ।) देवगृहविशेषः । पञ्चरत्न इति ख्यातः । यथा,—
“पक्केष्टकचितं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो व्रजेद्दिवम् ॥”
इत्यग्निपुराणम् ॥